# ॥ ऋणमोचनस्तोत्रम् ॥

देवताकार्यसिद्ध्यर्थं सभास्तम्भसमुद्भवम् ।
श्रीनृसिम्हं महावीरं नमामि ऋणमुक्तये ॥ १ ॥

लक्ष्म्यालिन्गितवामाङ्गं भक्तानां वरदायकम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ २ ॥

आन्त्रमालाधरं शङ्खचक्राब्जारुधधारिणम् ।
श्रीनृसिम्हं महावीरं नमामि ऋणमुक्तये ॥ ३ ॥

स्मरणात्सर्वपापघ्नं कद्रूजविषनाशनम् ।
श्रीनृसिम्हं महावीरं नमामि ऋणमुक्तये ॥ ४ ॥

सिम्हनादेन महता दिग्दन्तिभयनाशनम् ।
श्रीनृसिम्हं महावीरं नमामि ऋणमुक्तये ॥ ५ ॥

प्रह्लादवरदं श्रीशं दैत्येश्वरविदारणम् ।
श्रीनृसिम्हं महावीरं नमामि ऋणमुक्तये ॥ ६ ॥

क्रूरग्रहैः पीडितानां भक्तानामभयप्रदम् ।
श्रीनृसिम्हं महावीरं नमामि ऋणमुक्तये ॥ ७ ॥

वेदवेदान्तयज्ञेशं ब्रह्मरुद्रादिवन्दितम् ।
श्रीनृसिम्हं महावीरं नमामि ऋणमुक्तये ॥ ८ ॥

य इदं पठते नित्यमृणमोचनसंज्ञितम् ।
अनृणी जायते सद्यो धनं शीघ्रमवाप्नुयात् ॥ ९ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचितं नृसिम्हपुराणोक्तं
ऋणमोचनस्तोत्रं सम्पूर्णम् ॥